.. nArAyaNam bhaje nArAyaNam ..

# ॥ नारायणम् भजे नारायणम् ॥

नारायणम् भजे नारायणम्   लक्ष्मी नारायणम् भजे नारायणम्--२
नारायणम् नारायणम्

वृन्दावन स्थितम् नारायणम्
देववृन्दैर् अभिस्थितम् नारायणम् ... नारायणम् भजे ...

दिनकर मध्यम् नारायणम्
दिव्य कनकाम्बर धरम् नारायणम्  ... नारायणम् भजे ...

पंकज लोचनम् नारायणम्
भक्त संकट मोचनम् नारायणम्  ... नारायणम् भजे ...

करुणा पयोनिधिम् नारायणम्
भव्य शरणागत निधिम् नारायणम्  ... नारायणम् भजे ...

रक्षित जगत् त्रयम् नारायणम्
चक्र शिक्षिता सुरचयम् नारायणम्  ... नारायणम् भजे ...

अज्ञान नाशकम् नारायणम्
शुद्ध विज्ञान भाशकम् नारायणम्  ... नारायणम् भजे ...

श्रीवत्स भूषणम् नारायणम्
नन्द गोवत्स पोषणम् नारायणम्  ... नारायणम् भजे ...

शृगार नायकम् नारायणम्
पदगंगा विधायकम् नारायणम्  ... नारायणम् भजे ...

श्रीकान्त सेवितम् नारायणम्
नित्य वैकुण्ठ वसितम् नारायणम्  ... नारायणम् भजे ...

इति श्री नारायणम् भजे नारायणम् ।

Encoded by Suresh Vyas (mltipure@twrol.com)
Date: 2 January, 1999

Please send corrections to sanskrit@cheerful.com
Last updated January 19, 1999